Lesson 44 C. Shri Krishna Charitam.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| अपत्य child. ( N... yes, neuter gender!) | वि + रम् 1. P.P. to stop. | कदाचित् Once | अष्टम<br>मः- मी- मम् eighth |
| बाल्य childhood ( N) | व्रज् 1. P.P. to go. | तदानीम् then, at that time. | |
| इन्द्रयाग sacrifice in honour of Lord Indra. ( M) | उद् + धृ (उद्धर्) 1 .A.P. to lift up. | | |
| जन्मतिथि | नश् 4. P.P. to ruin. | | |
| कारागृह jail ( N) | नि + क्षिप् 6 P.P. to put into | | |
| धारासार torrents ( M) | हिंस् 1. P.P. to kill | | |
| गोप cowherd ( M) | वृष् (वर्षति) 1 P.P. to shower | | |
| | वर्ण् 10. U.P. to describe. | | |

श्रीकृष्णचरितम् ।

अस्माकं भारतीयानां रामकृष्णौ आदर्शौ । तयोः भगवान् श्रीकृष्णः सर्वेषाम् अतीव प्रियः अस्ति । श्रावणमासे कृष्णपक्षस्याष्टमः दिवसः श्रीकृष्णस्य जन्मतिथिः । यदुवंशे प्रसिद्धः वसुदेवः तस्य जनकः। देवकी च जननी । कंसः देवकीवसुदेवौ कारागृहे निक्षिपति । तयोः च सर्वाणि अपत्यानि हिंसति । अतः वसुदेवः श्रीकृष्णं गोकुलं नयति । गोकुले नन्दस्य गृहे सः वसति । बाल्ये बलरामेण गोपैः च सह श्रीकृष्णः विविधान् खेलान् खेलति स्म । यशोदा नन्दः च श्रीकृष्णे अतीव स्निह्यतः।

श्रीकृष्णस्य चरित्रे विविधाः कथाः प्रसिद्धाः सन्ति । कदाचित् गोपाः इन्द्रयागेन इन्द्रं पूजयन्ति स्म । तदानीं श्रीकृष्णः गोपान् उपदिशति ...गोपूजनं, वनस्पतिपूजनं, गिरिपूजनं च एवास्माकं

कर्तव्यम् इति । ततः श्रीकृष्णवचनात् गोपाः इन्द्रयागात् विरमन्ति, गोवर्धनं पूजयन्ति च । तेन देवेन्द्रः कुप्यति । सः धारासारैः गोकुलं वर्षति । अतिवृष्ट्या पीडिताः गोपाः श्रीकृष्णं शरणं व्रजन्ति । तेन सह गोवर्धनं चाश्रयन्ति । स्वयं समर्थः अपि श्रीकृष्णः गोपैः सह गोवर्धनम् उद्धरते । सर्वे अपि गोपाः श्रीकृष्णः इव हस्तेन वा काष्ठेन वा गोवर्धनं धरन्ति । गोपानां सङ्कटं श्रीकृष्णस्य साहाय्येन नश्यति । एवं श्रीकृष्णः ऐक्यमहत्त्वं स्वस्याचरणेन एव कथयति । एवंविधाः बहवः श्रीकृष्णकथाः वर्णयन्ति यत् श्रीकृष्णः उत्कृष्टः शासकः, श्रेष्ठः नायकः, दुष्टानां संहारकः, सज्जनानां रक्षकः, चतुरः सङ्घटकः च इति ।

श्रीकृष्णस्य गीता आदर्शभूतं जीवनम् उपदिशति ।